ಒಟ್ಟು ಮುದ್ರಿತ ಪುಟಗಳ ಸಂಖ್ಯೆ : 12 ]
Total No. of Printed Pages : 12 ]
ಒಟ್ಟು ಪ್ರಶ್ನೆಗಳ ಸಂಖ್ಯೆ : 45 ]
Total No. of Questions : 45 ]
ಸಂಕೇತ ಸಂಖ್ಯೆ: **16-S**

**Code No. : 16-S**

# A

**CCE RR**

Question Paper Serial No. **600**

इतः कर्तयत

## ವಿಷಯ : ಪ್ರಥಮ ಭಾಷೆ — ಸಂಸ್ಕೃತ
## Subject : First Language — SANSKRIT
## प्रथमभाषा — संस्कृतम्

**(ಪುನರಾವರ್ತಿತ ಶಾಲಾ ಅಭ್ಯರ್ಥಿ / Regular Repeater)**

ದಿನಾಂಕ : 28. 06. 2022 ] [ Date : 28. 06. 2022
ಸಮಯ : ಬೆಳಗ್ಗೆ 10-30 ರಿಂದ ಮಧ್ಯಾಹ್ನ 1-45 ರವರೆಗೆ ] [ Time : 10-30 A.M. to 1-45 P.M.
ಗರಿಷ್ಠ ಅಂಕಗಳು : 100 ] [ Max. Marks : 100

***ಪರೀಕ್ಷಾರ್ಥಿಗಾಗಿ ಸಾಮಾನ್ಯ ಸೂಚನೆಗಳು :***

1. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯು 45 ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ ಪ್ರಶ್ನೆಗಳನ್ನು ಹೊಂದಿದೆ.
2. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಹಿಮ್ಮುಖ ಜಾಕೆಟ್ ಮೂಲಕ ಮೊಹರು (ಸೀಲ್) ಮಾಡಲಾಗಿದೆ. ಪರೀಕ್ಷೆ ಪ್ರಾರಂಭವಾಗುವ ಸಮಯಕ್ಕೆ ನಿಮ್ಮ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಬಲಬದಿ ಪಾರ್ಶ್ವವನ್ನು ಕತ್ತರಿಸಿ, ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯಲ್ಲಿ ಎಲ್ಲಾ ಪುಟಗಳು ಇವೆಯೇ ಎಂದು ಪರೀಕ್ಷಿಸಿಕೊಳ್ಳಿ.
3. ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ ಪ್ರಶ್ನೆಗಳಿಗೆ ಕೊಟ್ಟಿರುವ ಸೂಚನೆಗಳನ್ನು ಪಾಲಿಸಿ.
4. ಬಲ ಭಾಗದಲ್ಲಿ ಕೊಟ್ಟಿರುವ ಅಂಕಿಗಳು ಪ್ರಶ್ನೆಗಳಿಗಿರುವ ಪೂರ್ಣ ಅಂಕಗಳನ್ನು ತೋರಿಸುತ್ತವೆ.
5. ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಓದಿಕೊಳ್ಳಲು 15 ನಿಮಿಷಗಳ ಕಾಲಾವಕಾಶವು ಸೇರಿದಂತೆ, ಉತ್ತರಿಸಲು ನಿಗದಿಪಡಿಸಲಾದ ಸಮಯವನ್ನು ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಮೇಲ್ಭಾಗದಲ್ಲಿ ಕೊಡಲಾಗಿದೆ.

***परीक्षार्थिनां सामान्यसूचनाः***

1. अस्मिन् प्रश्नपत्रे पञ्चचत्वारिंशत् (45) वस्तुनिष्ठाः विषयनिष्ठाश्च प्रश्नाः सन्ति ।
2. इदं प्रश्नपत्रं विपरीतेन आवरणेन मुद्रिताङ्कमस्ति । परीक्षासमये प्रश्नपत्रमुद्घाटयितुं दक्षिणपार्श्वेन कर्तयत । प्रश्नपत्रस्य पृष्ठानि पूर्णानि सन्ति इति वा पर्यालोचयत ।
3. विषयनिष्ठानां वस्तुनिष्ठानाञ्च प्रश्नानां विषये निर्दिष्टाः नियमाः अनुपालनीयाः ।
4. प्रश्नानां प्रति अधिकृताः अङ्काः पार्श्वे लिखिताः सन्ति ।
5. प्रश्नपत्रमुत्तरयितुं निर्धारितः समयावधिः प्रश्नपत्रस्य उपरि भागे लिखितः अस्ति । पञ्चदशनिमेषाः प्रश्नपत्रस्य पठनार्थं निर्धारिताः सन्ति ।

**TEAR HERE TO OPEN THE QUESTION PAPER**
प्रश्नपत्रमुद्घाटयितुमितः कर्तयत

**Tear here**

**I. अधोलिखितेभ्यः प्रश्नेभ्यः चत्वारः विकल्पाः प्रदत्ताः । तेषु समुचितं विकल्पं चित्वा क्रमाक्षरेण सह लिखत ।** **6 × 1 = 6**

1. 'घोरम्' अस्य समानार्थकपदम् इदं भवति ।

   (A) भूषणम् (B) भीषणम्

   (C) दूषणम् (D) शोषणम् ।

2. 'भीरुः' अस्य विरुद्धार्थकपदम् इदं भवति ।

   (A) शूरः (B) दूरः

   (C) क्रूरः (D) सूरः ।

3. 'महोदयः' अस्य स्त्रीलिङ्गरूपम् इदं भवति ।

   (A) महोदयी (B) महोदियी

   (C) महोदिया (D) महोदया ।

4. 'गच्छन्ति' अत्र एषः लकारः वर्तते ।

   (A) लङ्लकारः (B) लृट्लकारः

   (C) लट्लकारः (D) लोट्लकारः ।

5. 'वीरेण' अत्र एषा विभक्तिः वर्तते ।

(A) तृतीयाविभक्तिः (B) पञ्चमीविभक्तिः

(C) द्वितीयाविभक्तिः (D) षष्ठीविभक्तिः ।

6. 'भोजः भुवनेश्वरीविपिने हन्तव्यः' अत्र रेखाङ्कितपदस्य समुचितं प्रश्नवाचकपदम् इदं भवति ।

(A) कुतः (B) कुत्र

(C) कति (D) कथम् ।

**II. चतुर्थं पदं लिखत ।** **4 × 1 = 4**

7. वराहमिहिरः – बृहत्संहिता :: चरकः – ......................... ।

8. मोघलचक्रवर्ती – औरङ्गजेबः :: केळदीसाम्राज्ञी – ........................ ।

9. श्रृङ्गारः – रसः :: रतिः – ........................... ।

10. रष्यादेशः – अणुविकिरणः :: अर्टिक् प्रदेशः – .......................... ।

**III. एकवाक्येन उत्तरं लिखत ।** **7 × 1 = 7**

11. आकाशकायेषु आकर्षणीयः, शक्तिस्वरूपः कः ?

12. संस्कृतसाहित्यक्षेत्रे ज्ञानपीठप्रशस्तिपुरस्कृतः कः ?

13. राजारामस्य पिता कः ?

14. केसरी कुत्र राज्यं पालयति स्म ?

15. नाट्यशास्त्रस्य रचयिता कः ?

16. ध्रुवः नारायणं साक्षात्कर्तुं कुत्र प्रस्थितः ?

17. श्वेतपारावतौ दग्धुं कः इच्छति ?

**IV. द्वित्रैः वाक्यैः उत्तरं लिखत ।** **4 × 2 = 8**

18. दधीचेः तपोवनं कथम् आसीत् ?

19. भोजस्य जन्मपत्रिकां दृष्ट्वा दैवज्ञः किमाह ?

20. कविः कीदृशीं मातरं नमामि इति वदति ?

21. ध्रुवस्य भक्त्या सन्तुष्टः भगवान् विष्णुः किम् अकरोत् ?

**V. सूचनानुसारम् उत्तरं लिखत ।** **4 × 2 = 8**

22. सन्धिं विभज्य नाम लिखत ।

a) गौरियम् ।

b) नाम्भः ।

23. विग्रहवाक्यं विलिख्य समासनाम लिखत ।

a) प्रतिवर्षम् ।

b) जनसेवा ।

**अथवा**

समासं कृत्वा समासनाम लिखत ।

a) कपिः शार्दूलः इव =

b) श्वेतम् अम्बरं येषां ते =

24. वाक्ये विद्यमानं कृदन्तपदं चित्वा प्रत्ययस्य नाम लिखत ।

a) भक्तः देवम् अर्चितुं देवालयं गच्छति ।

b) बालकः ग्रामं गतवान् ।

25. वाक्यदोषं परिहरत ।

a) नगरस्य बहिः उद्यानम् अस्ति ।

b) कंसः कृष्णं क्रुध्यति ।

**VI. संस्कृतभाषया अनुवादं कुरुत ।** **1 × 2 = 2**

26. ಇಂದು ಕೊರೋನಾ ಮಹಾರೋಗವು ಎಲ್ಲಾ ಕಡೆ ವ್ಯಾಪಿಸಿದೆ. ಇದರಿಂದ ಎಲ್ಲಾ ಜನರು ಭಯಗೊಂಡಿದ್ದಾರೆ.

Now-a-days Corona has spread everywhere. Due to this all the people are fearful.

**VII. कर्नाटकभाषया, आङ्ग्लभाषया वा अनुवादं कुरुत ।** **1 × 2 = 2**

27. 'उद्योगं पुरुषलक्षणम्' इति वाक्यं प्रसिद्धं वर्तते । अद्य जनाः उद्योगार्थं देश-विदेशं गच्छन्ति ।

**VIII. यथानिर्देशम् उत्तरं त्रिचतुरैः वाक्यैः लिखत ।** **4 × 3 = 12**

28. "याचको भूत्वा अत्र अहम् आगतः" ।

कः पाठः ? कः अवदत् ? याचकरूपेण कः आगतः ?

29. "संस्कृतेनैव संस्कृतिरपि सुरक्षिता ।"

कः पाठः ? कः अवदत् ? केन संस्कृतिः सुरक्षिता ?

30. "भवतु अस्माकं महाराज्ञी अभयदायिनी" ।

कः पाठः ? के अवदन् ? महाराज्ञी का ?

31. "जग्राह सहसा रविम्" ।

कः पाठः ? कः अवदत् ? कम् अवदत् ?

**अथवा**

"अहमस्य प्रदास्यामि परमं वरमद्भुतम्" ।

कः पाठः ? कः वरं ददाति ? कस्मै वरं ददाति ?

**IX. कवेः देश-काल-कृतीनां विषये त्रिचतुरैः वाक्यैः उत्तरं लिखत ।** **2 × 3 = 6**

32. बल्लाळसेनः ।

33. कालिदासः ।

**X. पद्यपाठस्य नाम उल्लिख्य तात्पर्यं पञ्चषैः वाक्यैः कर्नाटकभाषया, संस्कृतभाषया, आङ्ग्लभाषया वा लिखत ।** **3 × 3 = 9**

34. यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति ।

सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ।।

35. चित्तशान्तिदायिनी विरक्तिबुद्धिवर्धिनी

भेदभावनाशिनी जनेषु चैक्यकारिणी ।

दुःखशोकहारिणी भवाम्बुधेश्च तारिणी

भारतीयभावना विवृद्धिमेतु भारते ।।

36. शालिशूकनिभाभासं प्रासूतेमं तदाञ्जना ।

फलान्याहर्तुकामा वै निष्क्रान्ता गहने वरा ।।

**अथवा**

धीरोद्धतो धीरललितो धीरोदात्तस्तथैव च ।

धीरप्रशान्तश्चैवेति नायकाः नाट्यसंश्रयाः ।।

**XI. वाक्ये विद्यमानं अलङ्कारं सलक्षणं समन्वयत ।** **1 × 3 = 3**

37. श्रीरामः समुद्र इव गम्भीरः ।

**अथवा**

सैन्धवमानय ।

**XII. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दोनाम लिखत ।** **1 × 3 = 3**

38. भूतेषु किं च करुणां बहुलीकरोति ।

**XIII. पद्यं पूरयत ।** **1 × 4 = 4**

39. पिबन्ति........................................................................................

..................................................................................................।

..................................................................................................

.................................................................................... विभूतिः ।।

**XIV. दशवाक्यैः उत्तरं कर्नाटकभाषया, संस्कृतभाषया, आङ्ग्लभाषया वा लिखत ।**

**3 × 4 = 12**

40. वक्षायुर्वेदग्रन्थे प्रतिपादितानां चतुर्विधवृक्षाणां विषये लिखत ।

41. 'नाट्यांशाः' इति पद्यभागे निरूपितान् नाट्यांशान सङ्गृह्य लिखत ।

42. आरोग्यनियमान् पद्यानुगुणं सङ्गृह्य लिखत ।

**अथवा**

'नगाधिराजः' इति पाठे अमरनाथगुहाविषये का पुराणकथा अस्ति ? विवृणुत ।

**XV. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत ।** **1 × 4 = 4**

43. भारतीयविज्ञानशास्त्रेषु आयुर्वेदस्य, योगस्य च महत्त्वपूर्णं स्थानं वर्तते । "योगः नाम चित्तवृत्तिनिरोधः" । ध्यानम्, आसनानि च चित्तवृत्तिनिरोधे सहायकानि भवन्ति । महाज्ञानी पतञ्जलिमुनिः योगशास्त्रम् अरचयत् । योगः न केवलं रोगनिरोधकः किन्तु रोगहर्ता च अस्ति । मानसिक-दैहिक-नैतिक-आध्यात्मिकविषयेषु औन्नात्यं साधयितुं योगः असदृशं साधन वर्तते । "योगादेव जीवनविकासः" इति स्वामी विवेकानन्दः अवदत् । योगः रक्तपरिचलनम् अबाधितं करोति । मधुमेहः, आस्तमा इत्यादि रोगाः अपि योगेन परिहृताः भवन्ति । योगाभ्यासेन शरीरसौन्दर्यं वर्धते । मनश्शान्तिः, आत्मानन्दः च भवति ।

छात्राणां सर्वतोमुखाभिवृद्धये योगः अत्यावश्यकः ।

**प्रश्नाः**

i) योगः नाम कः ?

ii) योगशास्त्रं कः अरचयत् ?

iii) योगविषये स्वामी विवेकानन्दः किम् अवदत् ?

iv) छात्राणां सर्वतोमुखाभिवृद्धये कः अत्यावश्यकः ?

**XVI. पत्रं लिखत ।** **1 × 5 = 5**

44. हावेरीमण्डलस्य सर्वकारीयप्रौढशालायाः छात्रः/छात्रा इति मत्वा अग्रजस्य विवाहार्थं दिनद्वयं विरामं सम्प्रार्थ्य कक्ष्याध्यापकं प्रति विरामपत्रं लिखत ।

**अथवा**

हैदराबाद्नगरं प्रवासार्थं गन्तुं द्विसहस्रं रूप्यकाणि प्रेषयितुं निवेद्य हावेरीनगरे निवसन्तं पितरं प्रति पत्रं लिखत ।

**XVII. दशवाक्यैः प्रबन्धं लिखत ।** **1 × 5 = 5**

45. समाचारपत्रम् ।

**अथवा**

जनसंख्यास्फोटः ।